This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

Accession No:- 891 M864
Title:- प्रबोधचंद्रिका
Author:- वैजलदेव
Date:- ?
Subject:- व्याकरण
पत्रे :- 25

Checked 2012

K.K.S.U. LIBRARY
RAMTEK
441 106
M-864
Dist. Nagpur

९०

॥श्रीगणेशायनमः॥ श्रीसंबंदे॥ हरिहरगुरुभक्तः सर्वलोकानुरक्तस्त्रिभुवनगतकीर्तिः कांतिकंदर्पमूर्तिः॥ रणरिपुगणका
लो वैजलक्षोणिपालो जगति जयति दाता सर्वकर्मीवदाता॥१॥ चंद्रावतीधदनचंद्रचकोरविक्रमादित्यभुपत
नयोनयतंत्रवेत्ता॥ चौहानवंशतिलकः पटनाधिनाथो राजाचिरं जयति वैजलदेवनामा॥२॥ रामो मेभिहितं करो
तुसततं रामं भजे सादरं रामेणापहृतं समस्तदुरितं रामाय दत्तं धनं॥ रामान्मुक्तिरभीप्सिता सरभसं रामस्यदा
सोस्म्यहं रामे रंजतु मे मनः करुणया भो राम मां पालय॥३॥ श्रीमद्वैजलदेवेन रामभक्तिरतात्मना॥ इति चिंति
तमेकांते कश्चित्तिष्ठतासता॥४॥ अस्थिवज्रमयं यस्य यस्य चर्मं च वर्मवत्॥ सदधीचिः सकर्णो वा नाति
ष्ठत्सुचिरं भुवि॥५॥ न संभ्रमति शरीराणि नराज्यानि धनानि वा॥ तेषां स्वर्गगतानां वै कीर्तिर्जागर्ति भूतले॥६॥
पद्मिनीपत्रजलवत्संसारो सर्वमस्थिरं॥ कीर्तिरक्षरसंबद्धा स्थिराभवति भूतले॥७॥ इहलोके सुखं येन पर
लोकेपि जायते॥ तदेवमस्यहं कर्मकर्तव्यं दूरदर्शिना॥८॥ संसाराम्भोधितरणं रामनामानुकीर्तनं॥ रामनामा
न्विता तस्मात् क्रियाक्रियते मया॥९॥ बालकानां प्रबोधाय तोषाय विदुषामपि॥ अंकस्मपिसंसारे कीर्तिसंस्थापनाय च॥१०॥
त

च्चिंतयन्निति निर्यातोऽक्रिष्टुतं श्रीहिराधरं ॥ श्रीमान्वै जलभूपालो विलोक्य प्रज्ञवीहकृतं ॥११॥ विद्यया द्योतते राज्यं विद्यया जीयते रिपुः ॥ विद्यया य
शायते कुसं विद्यया लभते यशः ॥१२॥ विद्यया जायते धर्मो धर्मेणार्थः प्रजायते ॥ अर्थेन जायते राज्यं सुखं राज्ये न जायते ॥१३॥ विद्यापि तेव
हितकृत् विद्या मातेव रक्षिका ॥ विद्याप्रियेव सुखदा विद्या कल्पलतोपमा ॥१४॥ धनानामथ सर्वेषां विद्याधनमनुत्तमं ॥ वर्धते दीयमानं य
न्नांतरायैर्विनश्यति ॥१५॥ चैरैर्न गृह्यते रोषाद्दायादैर्नैव भज्यते ॥ भक्षैर्न भुज्यते क्वापि न च संगुप्यते क्वचित् ॥१६॥ विद्याधनविहीनो यः
स का पुरुष उच्यते ॥ तस्माद्विद्यार्जने पुत्र यत्नं कुरु निरंतरं ॥१७॥ यावन्न राज्य गर्वस्ते यावन्न विषयग्रहः ॥ यावन्न यौवनमदस्तावद्विद्यामुपार्जय ॥१८॥
औदार्य धैर्य गांभीर्य शौर्यादि गुणसंयुतः ॥ विद्याविनयसंपन्नः सर्वे शोभवनिश्रियः ॥१९॥ दानेन दयया चैव युद्धेन निजकर्मणा ॥ दानवीरो दयावी
७लू रो युद्धवीर इति श्रुतिः ॥२०॥ दधीचिर्दानवीरो भूद्दयावीरः [illegible] शिबिर्नृपः ॥ हंमीरो युद्धवीरो भून्निर्दशानममीत्रयः ॥२१॥ स्वकर्मणैव पुरुषः प्रति
ष्ठाधिष्ठितो भवेत् ॥ यथा कृष्णश्च रामश्च पर्शुरामश्च पौरुषात् ॥२२॥ दुहराजाच्चरं कश्च मालनेन स्वकर्मणा ॥ इह दुःखं सुखं चापि भुंक्ते मात्
न कर्मणा ॥२३॥ स्वर्गं च नरकं चापि भजते निजकर्मणा ॥ स्वकृतः कर्मपाशोयं सर्वेषां सुदुरत्ययः ॥२४॥ एवं वदंतं पितरं विनीतः श्रीहि
राधरः ॥ कृतांजलिपुटो भूत्वा सव्रीडं इदमब्रवीत् ॥२५॥ मातापितृभ्यां चिरसंपरिणामसुखाय हं ॥ निःकं कटुकषायं वा भेषजं पीयते
सुतः ॥२६॥ श्रवणांजलिनापीतमुपदेशामृतं मया ॥ आज्ञाप्यतां मया देव किमिदानीं विधीयतां ॥२७॥ श्रीमान्वै ज

॥ चतुष्टयं हस्त्यश्वरथपादातं सेनांगं स्याच्चतुर्विधं ॥ स्वाम्यमात्यसुहृत्कोश राष्ट्रदुर्गबलानि च ॥ राज्यांगानि ७ प्रकृतयः पौराणां श्रेणयोऽपि च ॥ संधिर्नाविग्रहोयानमासनं द्वैधमाश्रयः ॥ षड्गुणाः ६ शक्तयस्तिस्रः
प्रभावोत्साहमंत्रजाः ॥ ३ क्षयस्थानं च वृद्धिश्च त्रिवर्गो नीतिवेदिनां ॥ भेदोदंडः सामदानमित्युपायचतुष्टयं ॥ ४

लभूपालः श्रीहिराधरबालकं ॥ सुपीय परितुष्टात्मा सुतमित्यवदत्पुनः ॥२८॥ नीतिविद्यास्त्रविद्या च द्वे राज्ञोऽभ्यहिते सदा ॥ तयोरप्यधिका नीतिराज्यं
हि श्रियते यया ॥२९॥ क्रियाकारकविज्ञाना नीतिः सम्यग्विविच्यते ॥ स्वादित्याद्दिपरिज्ञाना बुद्धिः शास्त्रे विवर्धते ॥३०॥ विना व्याकरणं
वाणी रमणी रमणं विना ॥ विवेकं च विना लक्ष्मीर्न सुखाय कदाचन ॥३१॥ तस्माद्व्याकरणं पूर्वं पठ त्वं बुद्धिवृद्धये ॥ पश्चान्नीतिं पठित्वा त्वं रा
ज्यं भज यथासुखं ॥३२॥ शक्तिराज्यांगसेनांगत्रिवर्गोपायषड्गुणान् ॥ यथाकाले हि युंजानो राजा राज्यं हि रक्षति ॥३३॥ क्रियाकारकसंबंधज्ञानमु
त्पद्यते यथा ॥ उत्कृष्टा प्रक्रिया सेयं लघ्वी संमतिपठ्यतां ॥ प्रबोधचंद्रिका नाम रामचंद्रसमाश्रिता ॥ अज्ञानतिमिरध्वंसकारिणी चित्तहादि
णी ॥३४॥ [redacted] बहवः प्रक्रिया ग्रंथाः संति चेत्संतु कौक्षिति ॥ मालतीमधुनः क्वापि मधुपानां मधुव्रतं ॥३५॥ विभक्तिज्ञानतो यस्मात्प्रबोधश्च
नोऽतिपद्यते ॥ तस्मादिह प्रथमतो विभक्तिः प्रतिपद्यते ॥३७॥ स्वादिस्त्यादिर्विभक्तिर्द्विः स्वाद्यौ सप्त विभक्तयः ॥ एकद्विबहुसंज्ञानि व
चनानि च सप्तसु ॥३८॥ प्रथमा च द्वितीया च तृतीया च यथाक्रमं ॥ चतुर्थी पंचमी षष्ठी सप्तमी चेति ताः क्रमा
त् ॥३९॥ प्रथमैव विभक्तिः स्यादुक्ते कर्तरि कर्मणि ॥ अनुक्ते कर्मकर्त्रादौ द्वितीयाद्या विभक्तयः ॥४०॥ तत्रोक्ते
कर्तरि यथा रामो जयति वैरिपून् ॥ रणे रामौ च रामाश्च जयतश्च जयंति च ॥४१॥ संबोधनेपि प्रथमा विभक्ति

भक्तिर्भवति ध्रुवं ॥ यथा हे राम हे रामौ हे रामा इत्यनुक्रमात् ॥४२॥ हेशब्देन विनापि स्यात्क्वचिद्दृष्टेपि हे भवेत् ॥ यथा राम मम सीदत्वं राम हे त्वां भजाम्यहं ॥४३॥ इत्युदाहरणं त्वनुक्ते कर्तरि केवलं ॥ अथोदाहरणं किंचिदुक्ते कर्मणि कथ्यते ॥४४॥ न जीयते न जीयेते न जीयंते रणांगणे ॥ रामो रामौ च रामाश्च शत्रुभिश्चेति निश्चितं ॥४५॥ प्रथमांतस्य कर्तुश्च कर्मणश्चानुगम्यते ॥ संख्याद्यैरनुक्तस्य न कदापि निबुध्यतां ॥४६॥ अनुक्ते कर्मणि भवेद्द्वितीया सा निगद्यते ॥ रामं रामौ च रामांश्च भजाम्यहमहर्निशं ॥४७॥ अनुक्ते कर्तरि भवेत्तृतीया करणेपि च ॥ यथा रा रामेण रामाभ्यां रामैर्वा जीयते रिपुः ॥४८॥ करणे दीयते किंचिदुदाहरणमुत्तमं ॥ रामः शरांश्छि शत्रूणां निकृंतति सितैः शरैः ॥४९॥ अनुक्ते संप्रदाने स्याच्चतुर्थी सा निगद्यते ॥ फलं रामाय॥ रामाभ्यां रामेभ्यो द =

राम
॥२॥

नमुक्तस्मै ॥५०॥ अनुक्ते स्यादपादाने पंचमी सा विधीयते ॥ यथा रामाद्रामाभ्यां रामेभ्यो मुक्तिरिप्सिता ॥५१॥ अनुक्ते स्या
त्संबंधे षष्ठी तस्यादुदाहृतिः ॥ रामस्य रामयोश्चापि रामाणां कीर्तिरुत्तमा ॥५२॥ अनुक्ते चाधिकरणे सप्तमी जायते यथा ॥
रामे च रामयोश्चापि रामेषु श्रीर्विहारिणी ॥५३॥ इसुदाहृतयोत्तोदि सप्तस्वपि विभक्तिषु ॥ केनचित्कारणेनासावन्यत्राव-
स्थितिर्यथा ॥५४॥ शीङ्स्थासामधिपूर्वाणामाधारः कर्म तद्यथा ॥ अधिशेते वनं रामो अध्यास्ते चाधितिष्ठति ॥५५॥
अन्वधिप्रतिरक्षानां योगे कर्म भवेद्यथा ॥ अधिरामं रिपू रामं प्रतिधावति मे मनः ॥५६॥ अनुरामं प्रतिदिनं मानसं मे प्र
सीदति ॥ कालाध्वनोश्च संयोगे दिनं क्रोशं निषीदति ॥५७॥ अंतरेणांतरा योगे द्वितीया स्याद्विनापि च ॥ न मुक्तिर्जायते राममंतरेणांतरा
विना ॥५८॥ समया निकषा हा धिगुपर्यध्यधसामपि ॥ अं [illegible] डुःश्च योगे च भवेद्द्वितीया समुदाहृतिः ॥ काननं समया रामो निकषा
भरतः पुरीं ॥ हा सीतां विपिने भ्रांत्ये रावणं धिग्जहार यः ॥६०॥ हरमूर्धानमुपरि गंगा भाति हरेरपि ॥ अधिपादांबुजमधो राम पादमहं भजे
॥६१॥ आ राम पादमनिशं प्रणतिः क्रियते मया ॥ राममभायसत्तिस्यां तं महीयं नावसीदति ॥६३॥ क्रियाविशेषणं कर्म नपुंसकमपीष्यते ॥ यथा
निःशंकमनिशं लंकां रामो विलोकते ॥६३॥ तृतीया जायते हेतौ तथेत्थंभूतलक्षणे ॥ रामभक्त्या भवेन्मुक्ती रामश्चापेन कानने ॥६४॥
सहार्थे च यथा रामो लक्ष्मणेन सहागतः ॥ विनायोगे यथा रामो लक्ष्मणेन विना नहि ॥६५॥ तृतीया संप्रदानार्थे निंदा चेत्तंदाहृतिः ॥ दु
माकांदास्य तिपापीयैः ब्राह्मणः संप्रयच्छति ॥ चतुर्थी गमनार्थस्य धातोः कर्मणि वा यथा ॥ जगाम रामचंद्रोसौ वनाय पितुराज्ञया ॥६७॥
ताद्र्थ्येपि यथा दारू रामयूपाय तिष्ठति ॥ क्रियायोगे यथा रामो भोजनाय प्रवर्तते ॥६८॥ [illegible] नमस्स्वस्त्यादि योगे च यथा रामाय ते नमः ॥ स्वस्ति
रामाय देवाय स्वाहा पित्रे स्वधा सधा ॥ सीताविरहखिन्नोपि रामोलं रावणाय वै ॥ वषट्कार्थे च तु [illegible] स्या मन्यक
दा

३ र्मण्यनोरदे ॥७०॥ यथा त्वाहं तृणं मन्ये मन्ये त्वाहं तृणाय वा ॥ तथा चतुर्थी रुच्यर्थधातोः प्रीतो भवेद्यथा ॥७१॥ रामाय
रोचते नित्यं रावणस्य वधो यमः ॥ ईप्सिते स्पृहधातोश्च रामाय स्पृहयाम्यहं ॥७२॥ उत्तमर्णे च धारेर्धा स्लुतुभ्यंस्व
धारयाम्यहं ॥ क्रोधादेः कर्मणि स्यात्सा रामः कुप्यति शत्रवे ॥७३॥ क्रुध्यसत्सूयति द्रुह्यत्य रूमीर्ष्यति संगरे ॥ रामः शत्रु
गणायेति चतुर्थी समुदाहृता ॥ पंचमी जायते हेतौ समान्मुक्तिः प्रजायते ॥ भयहेतौ यथा रामात् बिभेति युधि रावणः ॥७५
॥ पतत्स्त्राणयथा तत्र रामत्रापस्य मां भयात् ॥ यतोधीते यथाधीते रामात्स्वं देवमां जनिः ॥७६॥ यतो जन्म यथा गंगा हि
दु रिपादात्प्रजायते ॥ तस्मात्कर्षस्तत्रस्या तत्र यथा रामो वरो न्यतः ॥७७॥ धारणं च यतस्तत्र यथा दुर्विनया सिना ॥ तनयं
वारयते स रामो मां नरकार्णवात् ॥७८॥ अन्यार्थादिप्रयोगेपि यथा न्यो रामईश्वरात् ॥ भिन्नः कृष्णात्प्रजास्त्वष्टा भि
न्नो रामाद्विभीषणः ॥७९॥ रामान्नैवेतरः सेव्यो न च रामाद्धनेसुखं ॥ दिग्देशकालयोगे च ग्रामात्पूर्वं स्थितिर्मम ॥ (5)
८०॥ उत्कलात्पश्चिमे जैपपट्टनारन्यमुत्तमं ॥ रामोसौ रूक्ष्मणान्ये ष्ठो विनायोगेपि दृश्यते ॥८१॥ विना रामान्न मु-
क्तिः स्याद्यतः सा प्रक्षणे ततः ॥ पंचमी स्याद्यथा रामः प्रासादात्प्रेक्षते पुरीं ॥८२॥ स्मरणार्थस्य धातोर्वा षष्ठी कर्मणि तद्यथा
॥ स्मरामि रामचंद्रस्य चरणांभोजयोरहं ॥८३॥ हिंसार्थस्य यथा रामः शत्रोरु याप यश रू ॥ पिनष्टि रजनीसंहिजेयंस
र्वत्र पंडितैः ॥८४॥ तृप्त्यार्थधातोः कर्णे षष्ठी वा जायते तु नैः ॥ तृप्तो रामः फलैरेव फलानां वा वनेवसत् ॥८५॥ अनादरे २
र तथा

च षष्ठी स्यात्सप्तमी च यथा तव ॥ पश्यतो हरति द्रव्यं तस्करस्त्वयि पश्यति ॥८६॥ निर्धारणे च षष्ठी स्यात्सप्तमी च यथा
वरः ॥ रामो नृपाणां शूराणां नृपेष्वपि धनुर्धरः ॥८७॥ क्तसंयोगे तथा षष्ठी भवेत्कर्तरि तद्यथा ॥ रावणस्य पुरी लं
कागतव्यास्म भूपतेः ॥८८॥ सप्तमी सति योगे स्यात्सति रामे कुतो भयं ॥ सत्यर्थयोगेपि यथा रामे नरकभीर्नहि ॥
ने ग ॥८९॥ निमित्तात्कर्म योगेपि ह्यार्द्र रूहति चर्मणि ॥ निमित्तेपि यथा मुक्तौ रामोयं सेव्यते मया ॥९०॥ क्रियया चेल्लक्षि था
लक्ष्या तत्र स्यात्सप्तमी यथा ॥ मयि रवादति रामो गां गम्या धाम सुपागतः ॥९१॥ एवं सर्वेषु लिंगेषु विभक्ति वच
नेषु च ॥ उक्तानुसारि विज्ञेयमुदाहरणमुत्तमं ॥९२॥ इति ॥ विभक्ति चंद्रिका मध्ये समाप्ता स्यादि चंद्रिका ॥१५॥
॥ श्रीरांवंदे ॥ अथ त्यादिविभक्तीनामुदाहरणमुच्यते ॥ अथ स्युः पुरुषास्त्यादेः प्रथमो मध्यमोत्तमौ ॥१॥ ए
कैकशस्तेषु त्रिषु स्याद्वचनत्रयं ॥ उदाहरणमेवैषां रूपमाविर्भविष्यति ॥२॥ प्रथमः शेषयोगे च युष्मद्योगे च म
ध्यमः ॥ उत्तमोस्मत्प्रयोगे च गम्यमानेप्ययं विधिः ॥३॥ यथा जयति रामोरीन् रामौ जेतु यतोरिपून् ॥ रामा जयंति
संग्रामे दुर्जयान्वैरिणां गणान् ॥४॥ जयसि त्वं रिपून् राम जयथो रिपुवारणे ॥ हे रामौ युधि हे रामा यूयं जयथ वै
रिपून् ॥५॥ हें अंजयामि रामस्य भक्त्या नरकमागतं ॥ आवां जयावः इति नो जयामो वयमुत्तमं ॥६॥ सा
नु

दीनां नवपूर्वार्धं परस्मैपदमुच्यते ॥ उत्तरार्धं नवज्ञेयमात्मनेपदसंज्ञकं ॥७॥ परस्मैपदमादिष्टं धातोः कर्तरि
४ वलं केवकं ॥ यथाख्यातिरामोयं लक्ष्मणेन सहौषधं ॥८॥ आत्मनेपदमादिष्टं भावे कर्तरि कर्मणि ॥ तत्र भावे
यथारण्ये रामेण वत शय्यते ॥९॥ यथा कर्मणि रामेण जीयते शत्रुरुद्धतः ॥ यथा कर्तरि रामस्य शोभते मुखपिं
दुवत् ॥१०॥ सकर्मकाः कर्महीना धातवो द्विविधा मताः ॥ सकर्मकाणां धातूनां सादिः कर्मणि कर्तरि ॥११॥ अ
कर्मकाणां धातूनां भावे कर्तरि जायते ॥ रम्यते रामचंद्रेण रामो सौ रमते वने ॥१२॥ यथा कर्तरि रामो सौ सरव्य
जयति वैरिणं ॥ यथा कर्मणि रामेण जीयते शत्रुरुद्धतः ॥१३॥ प्रधाने कर्मणि प्यादि जायते हि द्विकर्मकं ॥ यथा
रामेण सीतैषा नीयते निर्जनं वनं ॥१४॥ अप्रधाने दुहादीनां यथा रामेण दुह्यते ॥ पृथिवी तूर्णं चलं रत्नं याचते
समरे रिपुः ॥१५॥ मयावरुध्यते बुद्धो श्रीरामपदपंकजं ॥ सीतया प्र[illegible]यते
छ्य

रामः पंथानमतिभीतया ॥१६॥ भिक्ष्यते लक्ष्मणेनासौ रामोनुग्नरसमुत्तमे ॥ रामेण चीयते पाथो गंगा संभाष्यते नु जः ॥१७॥ त्रास्यते लक्ष्मणो ध क्ष्म
र्मेदं उयते दुर्जनो धनं ॥ मथ्यते जलधी रत्नमेवमादिकमूह्यतां ॥१८॥ कर्तृकर्मणि गत्यादौ रैतौ स्वीयेच कर्मणि ॥ यथा दृष्टार
ना२ थे [illegible] घ [illegible] रामो यं पाप्यते वनं ॥१९॥ ओदनः पच्यते विप्रैरामचंद्रेण [illegible] मता ॥ क्राम्यते घोटकाः शूरैः सेवके दीप्यते ध धी
नं ॥२०॥ भावकर्मोभयत्रस्व स्वस्यादयः केचनाधुना ॥ कथ्यंते कर्तरि खरः खलः स्नेहो विलीयते ॥२१॥ उत्पद्यते गु
५ ते रोस्नेहो रामो यं ध्रियते वने ॥ वाचमाजल्पै रामः श्लाघ्यते भक्तमात्मनः ॥२२॥ जायते रामचंद्रस्य मुखकांतिः प्रतीयते
घ्र ॥ क्षिप्यते सेवकं क्रुध सन्यासी त्रास्यते द्विजं ॥२३॥ रुज्यते मम ती रामे ध्रियते खड्गमस्त्र च्छक ॥ दीपः प्रकीर्य
ते रात्रौ खिद्यते विरही जनः ॥२४॥ राम प्रपूर्यते विम्बं कीर्यानैव विसृज्यते ॥ शूरायं रोक्ष्यते युधे रामो यपीयते पयः
॥२५॥ रा त्वेवैबुध्यते रामः सेनान्यमन्यते गेहं ॥ रामोनत्यते हंतुं हूयते विरहातुरः ॥२६॥ दृप्यते क्षीयते चासौ इ
ली [illegible] यते [illegible] पर्णवस्तूपानि ॥ डीयते भयतः पक्षी मतिरेषा प्रमीयते ॥२७॥ दीप्यते च चंद्रमा रात्रौ समुद्रस्मात्प्रपूर्यत
॥ कौ शील्यात्सूयते रामं कारुण्याच्च म्रियते स्तती ॥२८॥ एतादृशाणि रूपाणि भवेयुर्भावकर्मणोः ॥ अन्यान्यपि
यथाप्राप्तमूह्यतां स्वपमेव च ॥२९॥ इतिवैजनभूपालस्य प्रबोधस्य चंद्रिका ॥ विभाति चंद्रिका मध्ये समाप्ता

यु३ वि नृ२

श्वादिश्चैन्द्रिका॥ अथ षट्कारकाणि कथ्यंते कथितान्यपि॥ अर्थाद्रत्नाभक्तीनां कारकत्वेन निदर्शिताः॥१॥ कर्ता कर्म च करणं संप्रदा
नं तथैव च॥ अपादानं तथाधार इति षट्कारकाणि वै॥२॥ स कर्ता यः क्रियां साक्षादुत्पादयति सर्वतः॥ तत्कर्म क्रियया पाप्तुवि
यु३ षयीक्रियतेतरां॥३॥ क्रिया निष्पद्यते येन करणं तदुदाहृतं॥ संप्रदानं तदेव स्याद्यस्मै सम्यक् प्रतीयते॥४॥ यदपादीयते नूनं त
दृ दपादानमुच्यते॥ येनैवाध्रियते सर्वं स एवाधार उच्यते॥५॥ स्वतंत्रो हेतुकर्मा च मुक्तकर्तेति पंचधा॥ उदाहरणमेतेषां रू
॥५॥ पमाचिर्नविख्याति [illegible]॥ [illegible] स्वतंत्रकर्ता स भवेन्निरपेक्षः क्रियासु यः॥ यथा भजाम्यहं रामं भक्त्या ९ प
रामः प्रसीदति॥७॥ स हेतुकर्ता भवति कुर्वंतं कारयेत्तु यः॥ यथा पालितवान् रामः पितानं याधपदः॥८॥ गतिबुध्य
यो भवेत् कर्ता स हेतौ शनार्थेषु त्राद्व कर्मस्व कर्मसु॥ अरे तोष्कर्म जायते॥९॥ गमनार्थे यथा रामो वनं गच्छति धार्मिकः॥ रामं दशरथो राजा विपि
नं गमयत्यमुं॥१०॥ नीवह्योर्गमनार्थेषु प्रतिषेधो भवेद्यथा॥ ज्ञानं किं नयति श्रीमान् यो [illegible]ध्यां रघुनंदनः॥११॥ ज्ञानकोना
ग थयत्येनां सीतां रामं चाची मता॥ एवं बहिरूहा हायं मता बुध्यर्थधातुषु॥१२॥ लक्ष्मणो बुध्यते कार्यं रामस्तं बोधयत्य[illegible]दः॥ भक्षणा
र्थे यथा रामो भक्ते भुंक्ते क्षुधातुरः॥१३॥ रामं भोजयति प्रीता सीता सघृतमोदनं॥ भक्षणार्थनिषेधः स्यात् खादिखाद्योस्कृतयो सौ
६ था॥१४॥ रामोन्नमत्ति सीतान्नं रामेणादयति [illegible]तं॥ एवं खादति रामोन्नं तेन खादयति प्रिया॥१५॥ शब्दकर्मक रामो मंत्रं
पठति बुद्धिमान्॥ तं गुरुः पाठयत्येनं निषेधो ह्वयतेर्यथा॥१६॥ रावणं ह्वयति श्रीमान् रामस्तं रावणो रिपुः॥ रामेणाह्वय

सि

यसेनेमहाबल विभीषणः॥१७॥अ कर्मसु यथा रामः श्रोतेतं ज्ञापयत्यसौ॥सीता निर्ब[illegible]धः कैदेह्यलथा ग्राह्यायतेरपि॥१८॥यथा सोक्षं दते

२द्रु सीतासीतयाक्षं दयत्यसौ॥रामश्चैत्य विरह एवं ग्राह्यायतेरपि॥१९॥हरते स्व करोतेरण्यभिवादि दृश्योरपि॥विकल्पः कथितः प्राज्ञै यथा

[illegible]स्तथा दाऽयते मया॥२०॥पाथेयं रामचंद्रस्य लक्ष्मणोहरति स्वयं॥हरयत्येष पाथेयं लक्ष्मणं लक्ष्मणेन वा॥२१॥करोति लक्ष्म

२४ णः कार्यं रामः कार्यति कृतं॥लक्ष्मणः कार्यमनुना लक्ष्मणेनेति या भवेत्॥२२॥अभिवादति रामो यं गुरुं रे तौ पुनः पुनः॥

अभिवादयते रामं गुरुं रामेण वा पिता॥२३॥लंकां पश्यति रामोयं रामे दृश्यते कपिः॥लंका रामेण वैसेवमुदाहरणमूह्यतां॥२४ सूद सेद

उक्तादन्यत्र नास्त्येव हेतौ कर्तुश्च कर्मता॥पाचकाश्च पचं सेन्नं पाचकैः पाच[illegible]यत्यसौ॥२५॥कापयत्येष सूदेन दापयेधनेनवे

॥इत्येवमादि बोद्धव्यमनुक्तमपि बालकैः॥२६॥कर्मकर्ता यथा राम ओदनः पच्यते [illegible] स्वयं॥उक्तकर्ता यथा रामो रावणं हंति

च सायकैः॥२७॥अनुक्तकर्ता यथा रामेण हन्यते रिपुः॥सर्वत्र चोक्त प्रथमा तृतीयानुक्तकर्तरि॥२८॥निर्वर्त्यं च विकार्यं

२ च प्राप्यं चेति त्रिधा भवेत्॥कर्मेतत्स तथाह्यियमी [illegible]तानी[illegible]ता दिना॥२९॥आनिचतेहियसूर्वतं निवसेमुदाहृतं॥य

सिंउ सि था रामपटं तंतुं तंतुवायः करोम्यहं॥३०॥घटया मिसुवर्णा मिराम चेद्रस्य कुंडले॥इत्यादि निर्वर्त्यमिदमनुक्तमपि चे

ष्यते॥३१॥विरतं क्रियते यत्तु तद्विकार्यमुदाहृतं॥रामः कांडं [illegible]लुनात्येष कांडकारोति कौश[illegible] जी॥३२॥सिद्धमेवान्यतो

६

॰यत्नप्राप्यं तत्प्राप्यमीरितं ॥ यथा स्मरामि रामं च रामचंद्रं नमाम्यहं ॥३३॥ कंदर्पशरमूढात्मा सीतां हरति रावणः ॥ क्रोधो धः खलो ददति
विषमिति प्राप्यमनीहितं ॥३४ ईप्सितानीप्सितं प्राप्यं यथा बालः क्षुधातुरः ॥ भुंजेते सरजस्कान्नं फलं धूलिमलीमसं ॥३५
सि[illegible]तं२ ३दु ३दु वृत्तेनैनं तुदुह्येते दुग्धं गोरेषा चे पयस्विनी ॥ इदं वाकथितं प्राप्यमुक्तं चेत्प्रवगम्यतां ॥३६॥ उपयोगनिमित्तं यत्तदेवा
कथितं मतं ॥ कर्तृकर्म यथा रामः ।सीतां कारयती स्मितं ॥३७॥ करणं द्विविधं प्रोक्तं बाह्यमाभ्यंतरं यथा ॥ शरीरावयवा
ध्रं५ दी यत्तदांभ्यंतरमुच्यते ॥३८॥ तस्मिन्न बाह्यमाख्यातं तयो बाणैर्निगद्यते ॥ रामो रावणं ण मूर्च्छाने निहंतति स्मितैः शरैः ॥३९
अयोध्यां दोलया याति जानक्या सह राघवः ॥ अभ्यंतरे यथा रामं मानसेन भजाम्यहं ॥४०॥ सीतावलोकने रामं नयनां
तेन सस्मितं ॥ सोनुरागकटाक्षेण स रामः सीतां विलोकते ॥४१॥ संप्रदानं त्रिधा प्रोक्तं प्रेरकं चानुमंत्रकं ॥ अनिराकर्तृ
कं चेति तत्र प्रेरकमुच्यते ॥४२॥ मुक्तिं भक्ताय रामो सो ददाति करुणान्वितः ॥ मह्यं मुक्तिं प्रदेहीति प्रेरणात्प्रेरकं मतं ॥
॥४३॥ अथानुमंत्रकं किंचित् उच्यते तापसैर्वने ॥ रामाया,तिथये दत्ते फलमूर्यथा विधि ॥४४॥ अप्रेरणात्स्वकृतस्य ले४
चानुमंत्रककर्मणा ॥ अनुमंत्रं भवेदेतदनिराकर्तृकं यथा ॥४५॥ पंचोदंचारान्रामाय भक्तलोकः प्रयच्छति ॥ अनिरा
र कर्णादेतदनिराकर्तृकं मतं ॥४६॥ आपादानं द्विधा प्रोक्तं चलं चाचलमेव च ॥ चलाद्पोगाना शीर्णा नेर्याति विषमं
विषं ॥४७॥ अचलं च यथा वृक्षात्पर्णं रामपतत्यधः ॥ हिमाद्रेरागता गंगा समुद्रात्कृत्नमुत्थितं ॥४८॥ चतुर्थ्याप्यधिकरणं त

त्राभिव्यापकं यथा॥ रामभक्तेभवेन्मुक्तिसीतायांचपतिव्रतं॥४९॥ [illegible]होपश्लेषिकं रामरामानूसिंहासनेस्थितः॥ सास्मितंवीक्षतेभूपोवैदेही
श्रमनेस्थिता॥५०॥ अथवैषयिकंरामोयोध्यायांचसतिस्वयं॥ वनेचसतिसिंहश्च शार्दूलोगिरिगह्वरे॥५१॥ अथ सामीपिकं रामः कपिसे
न्यसमावृतः॥ अवात्सीत्सागरेघोरे गंगायांवसतिस्वयं॥५२॥ संबंधस्यनशब्दज्ञैः कारकत्वमिहोच्यते॥ कारकंहिक्रियाहेतुः संबंधस्या
प्रधानता॥५३॥ साक्षात्क्रियाभिसंबंधं कारकंहिविदुर्बुधाः॥ स्वातंत्र्यस्यविवक्षायांस्थाल्यपिपचतिसेवकः॥५४॥ पाचकःपचतीत्याहोय
थास्वातंत्र्यताभवेत्॥ नतथाक्वापिसंबंधेयथारामस्यसेवकः॥५५॥ इतिश्रीचेजल्लभूपालकृतौकारकचंद्रिकाप्रबोधचंद्रिकायांवैस
माप्ता रामनामतः॥ ॥स्यादिभिस्तद्धितैः कृद्भिः समासैश्चविधीयते॥ यद्देचकारकंतत्रप्रथमेवचन्न्या तः॥१॥ उक्तानांचपदार्थानांस्यादेः
धेः संख्येवगम्यते॥ कृत्तद्धितसमासैश्चलिंगसंख्याविभक्तयः॥२॥ यथारहसिरामेणसानुरागेणसादरं॥ प्रीयतेप्रेयसीयाच्चःसुधा
रससहोदराः॥३॥ रिपूञ्जयतिरामोयंरामेर्वाजीयतेरिपुः॥ सीतामुखेन जीयंतेपूर्णेंदुचिकचांबुजे॥४॥ रामोसौकारकःसीता
अं कारिकाकारकंकुलं॥ अत्रकृत्कर्तरीस्येवलिंगादिभजतेतरां॥५॥ रामश्चवैय्याकरणःसावैय्याकरणीवधूः॥ तद्वैय्याकरणंसैन्य
भिसंभवतितद्धितः॥६॥ कृतप्रणामोरामोयंकृतप्रणामकंकुलं॥ सीताकृतप्रणामैषासमासःकारकेकृत॥७॥ प्रकृतिर्विकृति

विकृते
श्चापिस्याद्वक्ताचेघहातनहा॥ याचकैः प्रकृतैः संख्याग्रहे तैर्नहि॥८॥ जायंते सैतवो रामः पठः स्वर्णानि कुंडले॥ क्रियंते रामचंद्रस्य पच्यंते
॥७॥ शालितंदुलाः॥९॥ तं नवो रामचंद्रस्य पटीभूताश्च तंदुलाः॥ कृतास्योदनमित्यादौ लिंगादिकमपीष्यते॥१०॥ प्रधाने कर्मणि भवेद्द्वा
च्यकौ हि द्विकर्मणां॥ [illegible] अप्रधाने दुहादीनां हेतौ कर्तुश्च कर्मणि॥११॥ अयोध्यां नीयते सीता रामेण गुरु कर्मणा॥ रामो यं याच्यते मु
निं मया संसारभीरुणा॥१२॥ रामोयं याप्यते पित्रा वनं सत्यवशात्मना॥ गुरुणा मण्यते शिष्यः शास्त्रं चाभोज्यते पयः॥१३॥ व्यवदैघं च्छे४
विशेष्यं स्याद्यवच्छेदकमत्र तु॥ तद्विशेषणमाख्यातं रामो दाशरथिर्यथा॥१४॥ विशेष्यस्य हि यल्लिंगं विभक्ति वचने च ये॥ तानि का
र्याणि योज्यानि विशेषणपदे बुधैः॥१५॥ यथा दाशरथी रामो मां रक्षतु समंततः॥ कौसल्यानंदनं वंदे रामचंद्रं कृपार्णवं॥१६॥ शरण्येन च
रामेण दुर्जयो रावणो जितः॥ [illegible] जनकेन कृतादत्ता रामायतन शालिने॥१७॥ रामाद्विभ्यत कौ उद्विभेति युधि रावणः॥ रा
मस्य रावणानीककालस्य युधि विक्रमः॥१८॥ रामे विहरति स्फीता चिनयश्रीरहर्निशं॥ जानकीवदनांभोजमधुपानमधुव्रते॥१९॥ यत्रो
द्देश्यविधेयत्वं तत्रायं नियमो नहि॥ न तु स्यादजहल्लिंगमजहद्वचनं च यत्॥२०॥ रामभक्तिः प्रमाणं स्यात्करुणाभाजनं हरिः॥ मुक्ति ॥७॥
क्षेत्रमियं काशी ह्यजहल्लिंगमीदृशं॥२१॥ रामदाराश्च सीतेयं रत्नीतवाप्सरसः खलु॥ रामभक्तिर्मुक्तिगेहं जहद्वचनं त्विदं॥२२॥ ब
म

12

हुव्रीहिसमासेपि स्वल्लिंगानि जहत्यमी॥ सर्वशब्दाविशेषस्य लिंगादिकमुपासते॥२३॥ अंगीकृतप्रामाण्यो यं रामो वीक्षितदारकः॥ अनादृताप्स
रायस्क सोयमित्य वगम्यतां॥२४॥ उपमानोपमेयत्वं स्यान्नेदे लिंग संख्ययोः॥ अभिन्नैव विभक्तिः स्यादुपमानोपमेययोः॥२५॥ लिंगभेदे यथा
रामपत्नी गच्छति सालसा॥ मत्तमातंगवत्सा मंजु वा प्रपुष्पवत्॥२६॥ यथा वचनभेदे च कंदर्पर वसुंदरः॥ यूयं युवानो रामस्य भक्ता अ
हमिवोत्तमाः॥२७॥ त्वां राममिव पश्यामि रामेणेव त्वया जिताः॥ दुर्जयाः शत्रवः सर्वे रामायेव नमोस्तु ते॥२८॥ त्वत्तो रामादिव क्रुद्धाद्रणे ति शत्रवः त्विभ्यं
रामस्येव तव ह्येषा कीर्तिरत्रे त्रिलोक्यगामिनी॥२९॥ त्वयि राम इव प्रीतिं भजन्ते सकला जनाः॥ एकं लिंगं त्रये पि स्याद्वचनं क्रियते पि च॥३०॥ विंशत्या
द्याः संख्येकत्वे सर्वाः संख्येय संख्ययोः॥ संख्यार्थे तु यदा संख्यास्तदा द्वित्वादिकं भवेत्॥३१॥ विंशती रामभक्तास्युर्विंशती रामभक्तयः॥ सहस्रं राम
भक्तास्युः शतं रामस्य भक्तयः॥३२॥ लक्षं च रामभक्ताः स्युः कोटी रामस्य भक्तयः॥ संख्यार्थे तु यदा संख्यास्तदा द्वित्वादिकं भवेत्॥३३॥ यथा विंशतय
स्त्रिस्रो रामभक्ताः शतानि च॥ चत्वारि भक्तयः तिस्रस्तिस्रः सैन्यानि कोटयः॥३४॥ समुच्चये न वाक्यं चेद्द्वहूनां वा द्वयोश्च वा॥ अंगं च याश्रितासंख्यवा
च कानां विकल्पतः॥३५॥ श्रीरामश्चैव सीता च वनं गच्छति गच्छतः॥ रामश्च लक्ष्मणश्चापि भरतश्च प्रयाति च॥३६॥ प्रयांति वा पुरीं स्वीयां जेता जेतार एव च॥
पुरुषेषु त्रिषु भवेद्येष्ठश्च स्यात्सुरुषः पर॥३७॥ समुच्चये स एव स्यारव्या चापि तदाश्रिता॥ यथा रामश्च सीते [illegible] धुथो निर्जने वने॥३८॥ रामत्वमहमप्याश्र
स

गच्छ्वो गुरुशासनात् ॥ अहं च त्वं च रामश्च गच्छामो निर्जनं वनं ॥ ३९ ॥ प्रथमादि क्रमादेव मुख्यमोच्चारितेपि च ॥ मुख्यो गौणो लाक्षणिकः प्रयोग
॥८॥ स्त्रिविधो भवेत् ॥ ४० ॥ मुख्यः स्वार्थेन संपन्नो यथा व्यक्तं रघूद्वहः ॥ गुणयोगाद्भवेद्गौणो रामः क्रोधे विषं महत् ॥ ४१ ॥ स्वरं प्रति यमो रामो ॥ सिंह
स्याद्दूषणं प्रति ॥ स्वार्थेन्वयस्य बाधेन तात्पर्यस्यानुरोधतः ॥ ४२ ॥ लक्षणा कल्प्यते सापि द्विविधा स्यात्प्रयोगतः ॥ जहत्स्वार्थाजहत्स्वार्था तत्राद्या
कथ्यते यथा ॥ ४३ ॥ स्वार्थत्यागो भवेद्यत्र जहत्स्वार्थेति सा यथा ॥ रामो वसति पाथोधौ यमुनायां जनार्दनः ॥ ४४ ॥ यष्टीर्भोजय परवड्गांश्च खड्गांव
दृति संसरि ॥ यत्र स्वार्थापरित्यागो जहत्स्वार्थेति सा यथा ॥ ४५ ॥ छत्रिणो यां य समी काशीं काकेभ्यो दधि रक्ष्यतां ॥ पदार्थेप्यपदार्थेपि तात्पर्याल्लक्ष
णान्वयः ॥ ४६ ॥ एवं सर्वत्र बोध्यमनुक्तमपि बालकैः ॥ जाति व्यक्ति परत्वेन द्वेधा शब्दप्रवर्तनं ॥ ४७ ॥ तत्र जाति परत्वेन यथा त्वं भोजयातिथिं
ध्य ॥ अत्रैकत्वमतंत्रं स्याद्भोजने नातियोगिता ॥ ४८ ॥ ब्राह्मणान्भोजयस्व क्ते श्रोत्रियान्भोजयत्वसौ ॥ आत्या भोजयितुं नैव शक्तोस्मी त्ववधायसः
॥ ४९ ॥ त्रीनेव भोजय साधुना पर्याप्तिरवधारणे ॥ तात्पर्यविषये शब्दः प्रमाणमिति निश्चितः ॥ ५० ॥ श्रोतातस्त्वनुसारेण शब्दबोधे प्रव ॥८॥
र्तते ॥ विशेष्यक्रियया यस्यादुक्तकर्मादिकं पुनः ॥ ५१ ॥ विशेषण क्रियया प्याहर्तव्ये चेति विनिश्चितं ॥ यथा भुक्त्वा वनं रा ॥ ५२ ॥ ५१

भीर्य
मः समासितस भार्यया॥ रामेण गम्यते योध्या वनात् भ्रष्टकाष्ठकाननिच॥ उत्क्रमेवोत्क्रांतां यात्यति क्वचिद्व्युत्क्रममुत्क्रांतां॥ ५३॥ अनुक्रमपिनोक्तं
स्यात्क्वचिद्व्यपदांतरे॥ ओदनः पच्यते दृष्टो समासात् पुरुषेण हि॥ ५४॥ आरूढ वानरो वृक्षं दृश्यते दृश्यतेपि च॥ घटोयं ग्रान्थिको भाति
रामेण परिधीयते॥ ५५॥ कृष्णाद्दिवौकसादेव [illegible]पितदेवगृहि॥ न संतंचनटं रामो विलोकयति कौतुकी॥ ५६॥ छात्रंच वैयाकरणं शब्दानुपश्यति
न लक्ष्मणः॥ आरूढवानरं वृक्षं रामः पश्यति सादरं॥ ५७॥ कृत्वादिनोक्रमेवैदनुक्रमादिना भवेत्॥ न सत्तेगायते रंगे नटेन स्थीयते क्वचित्॥ ५८॥
भोक्तुं पचति रामोयमोदनं शुद्धरांगतः॥ रामभक्तः समानीय रामं पूजयति स्वयं॥ ५९॥ इत्याद्यनुक्रमेणस्याद्व्युत्क्रममेवं बुध्यतां॥ कर्म
जप्रसये नान्यक्वचिदप्युच्यते सभा॥ ६०॥ कृष्णोन दुह्यते गावो गवां गाश्चवापयः॥ समावैयान्वजेमुक्ती रामाद्रामस्य रामके॥ ६१॥
चैव पान्यते रामचंद्रेण याचकेनोदनोद्भुतः॥ क्वचित्कालादिकं सतेनान्यस्य कर्मणः॥ ६२॥ रामेण भूयते धर्मो मासं गीतंच गायते॥ कां
तोवुगम्यते क्रोशं कांतमास्तिनिग्धचेतसा॥ ६३॥ अन्यस्य कर्मणो संते कालाद्यं व्याप्य कर्मजः॥ कुंभकर्णेन सुप्यते षण्मासा रामभूभुजा॥ ६२
तु
६४॥ वनेद्वादशवर्षाणि स्थीयंते गुरुणासना॥ ६५॥ इति वैजलभूपालकृतबोधस्य चंद्रिके॥ ०॥ अनुक्रमचंद्रिका सम्यक् समासास्ति मनोहरा॥
समासः षड्विधो नाम्ना ज्ञेयः सामुपस्तथा॥ कर्मधारयसंज्ञश्च बहुव्रीहिस्तथैव च॥ १॥ द्विगुर्द्वंद्वोव्ययीभावः प्राधान्यं स्याच्चतुर्विधं॥
चच

(15)

पूर्वोत्तरोभयान्येषां पदार्थानां प्रकल्पनात्॥ २॥ द्विप्रधानस्तत्पुरुषस्तत्र पूर्वप्रधानके॥ प्रधानता यथा पूर्वकायस्त्वापरकायवत्॥ ३॥ उभयोत्तर
पदार्थस्य प्राधान्ये रामसेवकः॥ द्विप्रधानस्तथा कर्मधारयोऽपि भवेद्यथा॥ ४॥ रामः पुरुषसिंहोऽयं पूर्वप्राधान्यमीदृशं॥ नीलोत्पलमिवास्याक्षि रघु
नरपदार्थता॥ ५॥ द्विप्राधान्यं बहुव्रीहिरुभयत्र परत्र च॥ तत्रान्यस्य पदार्थस्य प्राधान्ये तल्लिंगवचने॥ ६॥ स्मृत रामोऽहमनित्रामुभयत्र पदार्थके॥
प्राधान्यतायभाग्द्विगोः पंचपाः सप्तपास्तथा॥ ७॥ उभयोः पदयोर्द्वे द्वे प्राधान्यं स्याद्द्विगोरपि॥ ७॥ राद्देवालो रामलक्ष्मणौ वनगामिनौ॥ ८॥ अत्र
फलीपंचपूली चेमादिबोधस्समुन्नतैः॥ भिन्नप्रधानोऽव्ययीभावस्तत्र पूर्वपदार्थके॥ ९॥ उत्तरस्मिंस्तु तत्प्राधान्यस्मिन् प्राधान्यमिह तत्र तु॥ यथोपरामांते रो
शामिलक्ष्मणस्येदृशं च॥ १०॥ उत्तरत्र प्रधाने तु संसारे स्मृत्वेव प्रति॥ अन्यत्र नय यथोन्मत्तगंगं हे त्रोत्तिशोभनः॥ ११॥ इत्थमिति प्रकारेण प्राधान्यं क्वचि
तं मया॥ समासानां पुनः शेषां व्याकुर्विधं निगद्यते॥ १२॥ स्यात्त्रिसत्वं मनसि सतं लुप्तं चालुक्त्वमेव च॥ तत्र नियमः समासानां कुंभकारोऽस्त्रलावकः
॥ १३॥ अत्रनिसो राजपुरुषो राज्ञः पुरुषरूप च॥ लुक्समासोऽयं यथा रामः स्मृतः पुरुषपुंगवः॥ १४॥ अलुक्समासश्च यथा कंठेकालो महेश्वरः॥
अथैषां च समासानां भेदः प्रत्येकमुच्यते॥ १५॥ तत्रा १ प्र. तत्पुरुषो विभक्तीनां च भेदतः॥ स्यात्प्रथमातत्पुरुषः पूर्वकायो धरांगकं॥
स्याद्द्वितीया तत्पुरुषो धन्यो रामः श्रितः पुमान्॥ स्यात्तृतीया तत्पुरुषो यथा धान्यार्थ इष्यते॥ १७॥ स्याच्चतुर्थी तत्पुरुषो यूप
दारुस्वि राजते॥ स्यात्पंचमी तत्पुरुषो नभेरात्तु भयं क्वचित्॥ १८॥ भवेत्षष्ठी तत्पुरुषो रामभक्तो भवाम्यहं॥ स्यात्सप्तमी तत्पुरुषोऽभि

षिक्तोंऽगे मुरद्विषः॥ १९॥ नञ्तत्पुरुषो ह्येष यथानेको हरिप्रियः॥ कर्मधारय एवं स्यात्सप्तधा स निगद्यते॥ २०॥ विशेषणपूर्वपदो यथा नी
लोत्पलं वरं॥ विशेषणोत्तरपदो यथा॥ विद्वत्व स्सचिकः॥ २१॥ विशेषणोभयपदो यथा॥ शीतोष्णमम्बु वं॥ उपमानपूर्वपदो रामशरः स्मरोत्त
मः॥ २२॥ उपमानोत्तरो रामचंद्रः पुरुषकेसरी॥ संभावनापूर्वपदो यथा रामधनं मम॥ सप्तधा स्याद्बहुव्रीहिर्द्विपदस्तत्र कथ्यते॥ २४॥ प्रथ
मार्थं विहायाऽसौ भवेत्षट्सु विभक्तिषु॥ सद्यानुरक्तो रामोऽहं चिरसेवितराघवः॥ २५॥ उपनीतबली रामो गृहं निगलकल्मषः॥ कृतप्र
णामो रामोऽयमित्यादि द्विपदा भवेत्॥ २६॥ अथाऽबहुपदः कश्चिद्बहुव्रीहिर्निगद्यते॥ पराक्रमार्जितमहा रामचंद्रो महीपतिः॥ २७॥
सुग्रीवकृतसेवोऽसौ विक्रमाहतरावणः॥ संख्योत्तरपदो यस्तु बहुव्रीहिर्निगद्यते॥ २८॥ उपविंशा नु पंत्रिंशा रामानेव भजाम्यहं॥
संख्योभयपदो ह्येष द्वित्रा रामानुवर्तिनः॥ २९॥ सहपूर्वपदश्चायं सानंदो रघुनंदनः॥ व्यतीहारः प्रहारश्चाय भायुद्धं सुसंमतं॥ ३०॥ केश
केशी सुवीराणां दंडादंडी समीहितं॥ दिगंतरालविषयो यथा॥ दिक्पूर्वदक्षिणा॥ ३१॥ इयमुत्तरपूर्वा स्याद्दियं दक्षिणपश्चिमा॥ द्विउ
द्विधैकवभ्रावो नैकवहवादितान्वितः॥ ३२॥ अप्रायो यथा पंचपुली त्रिशांगिचक्रगुन्नई॥ यथानानेकवभ्रावोत्रिलोकाभ्रुतुद्दीशः च
॥ ३३॥ अथ द्वंद्वसमासश्च चतुर्धा स निगद्यते॥ समुच्चयान्वाचययोः समासो नैव विद्यते॥ ३४॥ इतरेतरयोगोऽयं यथा तौ रामल

१०

16

क्ष्मणौ॥ रामलक्ष्मणशत्रुघ्ना जयंतिरिपुमंडली॥३५॥ समाहारो यथा शंखपटहं शोभते धुना॥ भेरीमृदंगपटहं शांखंज
नयतिस्फुटम्॥३६॥ द्विधास्याद्व्ययीभावो नाम पूर्वपदो यथा॥ न सुखं प्रतिसंसारे न सुखं प्रतिमे गृहे॥३७॥ स्याद्व्ययम
पूर्वपदो यथा स्यादुपतोरणम्॥ अभिरामं मनो मे घनिष्ठसंगतिसुखमखिलं॥३८॥ इति श्रीजलभूपालकृतप्रबंधस्य चंद्रिका॥ तस्या
मेषा समासास्याः समासानां च चंद्रिका॥ त[illegible]द्धितास्त्रिविधा ज्ञेयाः केचित्सामान्यवृत्तयः॥ केचिद्व्यसंज्ञाश्च केचि य
भावार्थवाचकाः॥१॥ सामान्यवृत्तयस्तत्र कथ्यंते केचनाधुना॥ तदस्यास्तीति गुणवान् रामो गुणवती प्रिया॥२॥ अर्क
वत् गुणवत्कूलमेवं सर्वत्र बुध्यतां॥ चूडालो रामचंद्रोसौ चूडाला रामवल्लभा॥३॥ वत्सलो रामचंद्रोयं मांसलस्कंदिलस्त
था॥ लोमशाः पामनः सीता लोमशा लोमशांकुलं॥४॥ पिच्छिला पदवी प्राज्ञो रामः प्राज्ञी च तद्वधूः॥५॥ छ॥ छ॥

मेषऊर्णायु
रेषः॥प॰५

प्राशंसरामकुलंश्वाद्वंद्वाचोर्वावार्तोऽयपूहूहः॥रामोसोदंतुरःसीतामधुरंरामभाषितं॥उषरंजलपात्रंस्यान्मुखरोरामभक्तिभाक्॥६॥क्षेत्रज्ञोराम
चंद्रश्चक्षेत्रज्ञारामवल्लभा॥मणिवोरामभद्रोयंसीतेयंहिहिरण्यया॥७॥रजस्वलावधूटीयंरामोलोकरूपीवलः॥धनीरामेश्चधनिनीसीता
चधनितत्कुलं॥८॥धनिकोरामचंद्रोयंधनिकाधनिकंकुलं॥यशस्वीरामचंद्रोयंजानकीचयशस्विनी॥९॥मायावीरावणोरामोमेधावीस्र
ग्वितत्कुलं॥दृद्दुर्णोविधुर्णः सस्याद्वाग्मीरामस्फुरावृणः॥१०॥वाचालोप्यतिवाचाटोवाचालानदूधूरलं॥फलिनोवृक्षाःएवोऽग्रफलिनीराम
वाटिका॥११॥बर्हिणोयंमयूरश्चबर्हिणंतत्कुलंपरं॥शृंगारकोवृषश्चैवधनुःशृंगारिकातथा॥१२॥त्रूणीतालुःपुरुषःस्त्रीचत्रूणीतालुकुल
३लु मुत्तमं॥एवमुत्सर्गाणुरन्वेष्योधातूनश्चनतात्स्यते॥१३॥तस्यापत्यमितिह्यर्थेवासिष्ठोभार्गवोमुनिः॥वासिष्ठीभार्गवीकन्यावासिष्ठंभार्ग
वंकुलं॥१४॥एवंकौरवमित्यादिबोध्यमितिसर्वतः॥निवासार्थेजानपदःपांचलीमाथुरास्तथा॥१५॥अपत्यार्थेदाशरथिमारुतीरा
यणिस्तथा॥नाडायन्याश्वलायनोगार्ग्योवात्स्यादयस्तथा॥१६॥वैनतेयश्चगांगेयस्त्रीभ्यःइत्यादयस्तथा॥चाटकैरश्चगोधारोगोधे

॥११॥
तोर

रः क्षत्रियस्तथा ॥१७॥ ज्ञेयं क्षौरव्य इत्यादिर्भवार्थे तत्र कथ्यते ॥ मूर्द्धन्यः कंठ्य ओष्ठ्यश्च तालव्यादिः शरीरतः ॥१८॥ दुर्गंधिश्च सुगंधिश्च
पूतिगंधिस्तथैव च ॥ फलितो पुष्पितो वृक्षः फलिता पुष्पिता लता ॥१९॥ तदस्य जातमित्यर्थे नभस्तारकितं तथा ॥ तेन रम्या गोवित्त चणो वित्त
चंचुस्तथैव च ॥२०॥ अयमेवातिशायनेत्यर्थे तल्लभ्यतेधुना ॥ पटीयश्च पटीयांश्च रामः सीता पटीयसी ॥२१॥ गरीयांश्च गरीयश्च प्रेष्ठः
प्रेयांस्तथैव च ॥ अयं पटुतरो रामस्तथा पटुतमश्च यः ॥२२॥ पटुकल्पः पटुदेश्यः पटुदेशीय इत्यपि ॥ असमासो भवेदेवं प्रकारवचने
तथा ॥२३॥ पटुजातीय इत्यन्नो राम इत्यादिकं भवेत् ॥ प्रमाणे जानुदघ्नं च जानुद्वयसमित्यपि ॥२४॥ जानुमात्रं जलमिदं जानुदघ्नी
नदीत्वियं ॥ तत्र नियुक्त इत्यर्थे रामदौवारिकोजनः ॥२५॥ दौवारिकीयरतनुर्दौवारिकमिदं कुलं ॥ तेन दीव्यति तेनापि जयतीत्यर्थगोचरे ॥
॥२६॥ आक्षिकादिर्भवेत्साधु संस्कृते दाधिकं भवेत् ॥ सामान्यतस्त्रयः प्रोक्ताः कथ्यंते व्ययसंज्ञकाः ॥२७॥ यतः प्रभृति रामोयं सेवितश्चेतसा ॥११॥

18

मया ॥ ततः प्रभृति कालस्य भीतिरुत्सयते न हि ॥२८॥ यत्र रामस्य सेवास्यात्तत्र मंगलमिष्यते ॥ अधुना सेव्यते राम इदानीं सेव्यते तथा २९॥
एतर्हि सर्वथा रामः सेव्यमित्थं कथं पुनः ॥ पुरस्तात्सेव्यते रामः सद्यः एवाद्य धार्मिकैः ॥३०॥ पूर्वेद्युः सेव्यते रामश्चान्येद्युः सेव्यते मया ॥
ऐषमश्च परुच्चैव परारिश्च निषेवितः ॥३१॥ उत्तरादक्षिणाच्चैव पश्चादुपरि च स्थितः ॥ उपरिष्टाच्च पूर्वेण दक्षिणात्युत्तरेणच
॥३२॥ द्विधा द्वैधं त्रिधा त्रैधं किंतरां सुतरां तथा ॥ अव्ययाः कथिताः एते कथ्यंते भाववाचकाः ॥३३॥ पटुत्वं पटुता रामे गरिमाद्य
ते महान् ॥ शौर्यं धैर्यं च गांभीर्यं सौभाग्यं रामभूभुजि ॥३४॥ ज्ञातेयं रावणे यत्र कोपेयं कपियूथपे ॥ प्राजापत्यमाश्वपत्यं पौरो
हित्याद्यस्तथा ॥३५॥ आश्वमेधं च कौमारं कैशोरं यौवनं तथा ॥ द्वैहायनं च मौनं च स्थाविरं मार्दवादयः ॥३६॥ मानोत्सुकं बाहुल
कं रामणीयकमित्यपि ॥ आचार्यकादयः प्रोक्ता भावार्थास्तद्धिता मया ॥३७॥ अतः परं कृतः केचित्कथ्यंतेतिप्रयत्नतः ॥ इति
वैजलभूपालकृतप्रभोधस्य चंद्रिका ॥ तस्यामेषा समासास्मात्तल्लाघ्यात तद्धितचंद्रिका ॥ ॥ श्रीरा: ॥ कृतस्त्रिष्वपि वर्तंते भावे कृ

॥१२॥ मंणिकर्तरि॥तत्रभावेयथारामेविजयोविनयस्तथा॥१॥तपोदमःशमश्चापिविग्रहोननुग्रहः॥आदरोयस्तथारामेयोगस्त्यागादय
स्तथा॥२॥पचनंहरणंस्नानंपवनंकारणादयः॥मुक्तिर्मुक्तिःधृतिश्चैवगीतिरि त्यादयस्तथा॥३॥पारणावेदनेत्यादिचिकीर्षेत्या
दयस्त्रियां॥जिगीषारामचंद्रेचबुभुक्षाबालकेतथा॥४॥छिदाभिदाविदाचैवजराप्रभृतयस्त्रियां॥अथकर्मणिभावेचकृत्यंते
कृचनाधुना॥५॥सकर्मकात्कर्मणियथातीर्णोरामेणसागरः॥निर्जितोरावणोवैरीसीतानीतापुरींनिजां॥६॥भावेयथाकर्मकेभ्यः
स्थितंरामेणकानने॥सुप्तंभूमौनिद्रितंसदारमितंसीतयानया॥७॥अयोध्यांचगतोरामःकर्तरीत्यादिगम्यतां॥तस्याद्यःकर्म
णिचभावेचनिवसंयमी॥८॥तत्रकर्तरियाषष्ठीदृश्यतेबहुलाहृतिः॥लंकारामेणगंतव्यारामचंद्रमहीपतेः॥९॥गंतव्यंरामचं
द्रेणस्थातव्यंचमयात्रहि॥दर्शनीयाचरामेणरामस्यचकृतावधूः॥१०॥ध्येयंरामपदांभोजंमयाद्यममसर्वदा॥रामनामामृतंपेयंगे
येचगुणकर्मणि॥११॥रामस्तुत्योमयानित्यंममरापुण्यकर्मणः॥रामसेवामयाकार्याममयापुण्यकर्मणः॥१२॥इष्टकारामयारामभक्तिः
स्यादुष्कृतापरेः॥रामस्यानुग्रहात्स्वर्गःसुप्रापोनात्रसंशयः॥१३॥सुपानंभक्तिभावेनरामनामामृतंमया॥त्रिभुग॥ ॥ ॥ ॥ ॥१२॥

सर्थकादित्यः [illegible] कोभावे दारिकर्मणि ॥१४॥ गतं वनं दाशरथिना रामचंद्रेण वनं गतः ॥ गतं रामेण कृतिनेत्येवं गत्यर्थधातुषु ॥
॥१५॥ अकर्मकेषु च यथा ग्रीष्मे शुष्को हृदोंबुना ॥ शुष्कं हृदे न शुष्कोयं हृदः सूर्येण भानुना ॥१६॥ आश्लिष्टा रामचंद्रेण सानुरागे
श्रीराम २ ण जानकी ॥ आश्लिष्टा रामचंद्राय रामेणाश्लि[illegible]ष्टमित्यपि ॥१७॥ सीतया चोपशाइतो रामः परमधा[illegible]र्मिकः ॥ रामे[illegible]ण
गुर चोपशयितं स चोपशायितः कृती ॥१८॥ उपस्थितोऽगुरुं रामो रामेणोपस्थितो गुरुः ॥ रामेणोपस्थितं चैवमनुक्तं
मपि बुध्यतां ॥१९॥ रामेणोपासितं नित्यं रामश्चोपासितो गुरुं ॥ रामेण गुरुभक्तेण चिरं गुरुरुपासितः ॥२०॥ नै
वेम ध्युषितो रामो रामेणाध्युषितं वनं ॥ रामेण चा[illegible]य ध्युषितमेवं बोध्यव्यमुत्तमैः ॥२१॥ उपजातः सुतः
जा पित्रा चोप[illegible]तः सुतं पिता ॥ उपजातं च पित्रेति सर्वत्र प्रबुध्यतां ॥२२॥ वानरो वृक्षमारूढो आरूढं वानरात्तैमैः राम
आरूढो वानरेणासौ सरस्तः फलसंयुतः ॥२३॥ सीतानुजीर्णा रामेण सोनुजीर्णः प्रियं सदा ॥ अनुजी
र्णं च रामेण त्रिषु रूपमिदं भवेत् ॥२४॥
रि

ष्वा

त्रि॰ष्वादिकर्मणि यथा प्रभुक्तं राम भभुजा ॥ प्रभुक्त ओदनो रामः प्रभु[illegible]क्तौ वरमौदनं ॥२५॥ अ॰ कर्मकात्समुत्त्रो वर्तेते
कर्तृभावयोः शुद्धा न[illegible] दीच शारदि शुद्धं न घेफशाहृतं ॥२६॥ अथ कर्तरि कथ्यंते क्त तः क्वचन संप्रति ॥ [illegible]राक
रिष्णुः सकलवै[illegible]णंरा[illegible] मभुपतिः ॥२७॥ हतवान् रावणं रामः कृतवान् कर्म दुष्करं ॥ देवकार्याणि कृतासौ
रामचंद्रो गुणाद्भुतः ॥२८॥ रामः [redacted] कृत्यविदस्य र्थं अरिभिः क्रोधजित्सदा ॥ रामकीर्तिः प्रस्मरा रामो यं शत्रुघस्म
रः ॥२९॥ ज[redacted] क्ता कच्चव राकच्च राम भीसाहरावणः ॥ त्रैलोक्यनंदनो रामः करया हीसमुद्रतः ॥३०॥ रामानंदो
म हा [illegible]त्वालो रामो जिगमिषुर्वनं ॥ यशोभि[illegible]आषुको रामो रावणं घातु[illegible]कः परं ॥३१॥ रामाऽस्या वनचरः क्रोधि
लंकार्थैरः कृ[illegible]ती ॥ सीतामु[illegible]रवा आमधुपो रामो भीष्टप्रदो भुवि ॥३२॥ क्वाद्यो ध्यापि ना[illegible]वे स्युं थाभो त्कुंत्र र्य
जयसौ ॥ मुक्त्वाद्य आमि नगरं भो कुंगच्छामि मंदिरं ॥३३॥ वीडायराज्ये रामेण गम्यते वनमद्भुतं ॥ रामो ह स[illegible] स
रंयाति ह सेया[illegible] सीतया सह ॥३४॥ गुरुणाद्दस्समानेन रामेण गम्यते पुरी ॥ सी[illegible]तां विलोकयामास रामो नाप्री
तिपीडनं ॥३५॥ इत्या[illegible]दि कृति बोध्य र्थं बुधै रुक्तानुसारतः ॥ ॥इति॰ समासेय कृदंतारव्यातस्या सर्व

॥
॥

या
अथवाऽल्पबोधाय सम्यक् संधिर्विरच्य[illegible]ते ॥ रामछत्रं हरिर्जौ विष्णुच्छ प्रयुरुछं वि ॥१॥ रामो म्लेच्छान् समाच्छि
द्य सीताच्छायामेपक्षते ॥ अग्रिमस्य छकारस्याद्वित्वमित्यपवधार्यतां ॥२॥ अथ प्रयत्नेन मया स्वरसंधिर्विधीयते ॥
रामवायस्त्विमध्वस्ति जानक्येषा पतिव्रता ॥३॥ मध्वानं दोमात्रा कौक्षावेत्ती साद्योयनी कृतं ॥ परोद्दिसं यथा
क्ये प.स्ते द ध्यास्ते मध्वनुत्तमं ॥४॥ जान[illegible]षा मात्रा कौक्षापक्षे प्रकृ[illegible]तिवद्यथा ॥ दधि आस्ते मधु अत्र मधुआ
आ नंद ईहृश ॥५॥ मातृं कौशितमिदं माल्त्र[illegible]रत्यादिकं भवेत् ॥ यणो मयोर्हे भवतः रतिपक्षे निगद्यते ॥६॥ दध्यास्ते रा
ध्या ममध्वत्र जानक्या याति सांप्रतं मम ध्वात्रं दोमात्राकौ[illegible]क्षा रत्तिपक्षन्चतुष्टय ॥७॥ चयनपवणौ चैवंचायके:[illegible] पावकः
स्तु[illegible] थांत वैराम[illegible] सीतेधात[illegible]नो दकमुपास्थितं ॥८॥ राम[illegible]सिरस्ति सीताध्वा रामाकारो विराजते ॥ तवैषा राम
सीतैवबतरामतवोदनं ॥९॥ सीतौह्याते सादिकेषु द्विर्भवतिनौश्चितं ॥ रामायतश्च सीत्यास्तदंधीदं जानकीहते ॥१०॥
मभूतमंमधूलृस्तनो भालः पिलर्षभः ॥ मातृकारद्वसादौ तु सवर्णे दीर्घरिष्यते ॥११॥ मित्रेत्ति छच्चिरंत्विष्णोपवन
यदु[illegible]कृतं परं ॥ इसाशाबाति सर्वत्र यदोपरमभाषितः ॥१२॥ यत्तले च विष्णुरह स्याररयादौ लोपरिष्यते ॥
विफवे लेनयये ते च भवे[illegible] द्दिष्णाविहिह्युपि ॥१३॥ ईषदर्थे कुशब्दस्य काददेशो कोष्णमीयपि ॥

22

२ पर्कं बलार्णं न यैवच ॥ वसनीर्णमृणार्णं । चदशार्णं

वेंद्र

१४ कराद्वेशेकद्रुष्णां च कवादेशोकयोष्णावत् ॥ १४ ॥ गोशब्दस्यावगिंद्रे स्याद्वें इतिकथ्यते ॥ गवाग्रं च गवोष्ट्रं च गवोदनमिति त्रयं ॥ १५ ॥
केचिद्वदंति गउष्ट्रं गवौदनमिति द्विधा विदुः ॥ प्रोढः प्रौढि स्तथा प्रेषः प्रैष्यस्तु स्वरवृद्धिभाक् ॥ १६ ॥ प्रार्णं वसनतरार्णं वृद्धिभाग्भवेत्
॥ १७ ॥ आघोडाच कदोढौ क क्रोमित्रे सेगुणा भवेत् ॥ स्वैरः स्वैरी स्वैरिणीति स्वरसंधिरुदाहृतः ॥ १८ ॥ अथ प्रकृतिवद्भावः कथ्यते मेतु
याधुना ॥ भो उ [illegible] स्मणउपैही [illegible] सीतेआगच्छ सत्वर ॥ १९ ॥ रामाक्षि ईश्वराम बाहु उत्तम इशो भि नो ॥ रामने त्रे इमे रम्ये राजीणीतु
वेद्वराशंकेक्षतः ॥ २० ॥ मणी वदंपातीवेतिनीशौ धा कस्यचीन्मते ॥ इवार्थे च वकारो यमितिवा कस्यचिन्मते ॥ २२ ॥ अमीअ
त्रे तिनो संधिर्बहुवेमी निगद्यते ॥ अ आ इ ई उ ऊ ऋ च उ उ तिष्ठादिकेष्वपि च ॥ ऐकस्वरे निपाते च न संधिरिति बुध्यतां ॥ अरो अहं नो अ
हं च निपातो नात्र संधिभाक् ॥ २४ ॥ आकारे नैव संधिः स्याद्वाक्यस्मरणयोर्यथा ॥ आ एवं मन्यसे राम आ एवमिति वै किल ॥ २५ ॥
ईषदर्थे क्रियायोगमर्यादाभिविधौ च यः ॥ एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित् ॥ २६ ॥ ईषदुष्णं जलं चोष्णं क्रियायोगे तथैव
च ॥ मर्यादायां फलं चोग्रं व्याप्तौ चैवार्यसंपदः ॥ २७ ॥ ह म कृतो वा हि [illegible] ऋद्धिरित्यादी केस्यचिन्मते ॥ न संधिरिति जानीहि
व्यंजने संधिरुच्यते ॥ २८ ॥ वर्गप्रथमवर्णानां परेतानां तृतीयकाः ॥ घोषवत्सु स्वरे चैव न भवति नहि संशयः ॥ २९ ॥
पंचमे पंचमा वा स्युस्तृतीया वेति निश्चितं ॥ सौभाग्यभाग सौरामौ वाग्जिगीषुरहिर्ब्रजं ॥ ३० ॥

शश्वजंताः षडं नास्त ङ्लं वाग गनुत्तमां ॥ तन्मयं चापि तन्मात्रं निसं बुध्यस्व यं वरं ॥३१॥ तन्निं दारामतन्निं दातं नीनाराम त
न्मयः ॥ तन्मात्रं राम तन्मात्रमेवं सर्वत्र बुध्यतां ॥३२॥ ङकारस्य चतुर्थं वा राम वाग्घस्य संयुता ॥ अङ्क्स लैौ षट् संतिस्मत
नुविः सहुलाशन ॥३३॥ शकारो वाघ्छकारः स्याद्रामो वाच्छोभतेधुना ॥ सघ्रेयो राम षट्छ्या मास्ते छ्रेष वाञ्छते तथा ॥३४॥
वीक्ष्य लक्ष्णा रामबालस्य तच्छोकश्च तथैव हि ॥ पक्षे शकारः सर्वत्र ज्ञेयः शाब्दिकसत्तमैः ॥३५॥ स्वरे तृतीयं जानीहि रामवा
गति कोमला ॥ वागुष्णा रावणस्यैषा वागेषा मधुरा तव ॥३६॥ अजयषडिति ब्रूयादिति वाचे तिनिश्चितं एवं बोध्य व्यमखिलमनु
क्तमपि बालकैः ॥३७॥ ह्रस्वोपधाश्च ङणना भवंति द्वित्वमेव हि ॥ मत्यङ्ङास्मासु गच्छीङ्ङः सन्नच्युतङ्ङिति त्रयं ॥३८॥
कुरूत्र चसक गस्सत्र भजं न्नत्रैव तत्सरं ॥ कवर्गे च टकारे च लकारे च तथा परे ॥ पररूपं नकारस्य कथ्यते तद्यथाहुतिः ॥३९॥ रामस्तच्च र
ति श्रीमास्तच्छत्रं न कदाचन ॥ तज्ज्ञातं न जकारेण तट्टीका तट्टकारवत् ॥४०॥ तड्डीनो विश्वतल्लीलातल्लकारं च तल्लघु ॥ एवं सर्वत्र बो
ध्यं विशेषणापि बालकैः ॥४१॥ नकारस्य पदांतस्य सकारो बिंदुसंयुतः ॥ चघयोर्जायते नित्यं कथ्यते तद्यथाहृतिः ॥४२॥ श्रीमां
श्चरति रामो यं भवांश्छादयति द्विषः ॥ षकारो बिंदुसंयुक्तः ष्टठयोश्च निगद्यते ॥४३॥ भगवांष्टीकते रामो भवांष्ठकुर एव च ॥

तथयोऽत्र सकारस्याद्भवांस्तरतिसागरं॥ ४४॥ भवांस्तथा महाप्राज्ञो यथा रामो रघूद्वहः॥ पक्षेनुसारहीनः स्याद्भवांश्चरतिसर्वतः
॥४५॥ प्रशांश्चरति नात्र स्यान्निषेधाग्रंथकारिणां॥ भवांश्छेते प्रभृतिषु ह्यलुक् पक्षेऽत्र पूर्ववत्॥ ४६॥ भवान्सलु क्ष्छड् यत्र टनासे
लुग्विधीयते॥ रामखं हसतीत्यादौ मोनुस्वारो विधीयते॥ ४७॥ त्वंकरोषि प्रभृतिषु विकल्पाद्वर्गपंचमं॥ लें यंते स्यादिषु द्विलेवि
भाषासानुनासिकं॥ ४८॥ तवर्गस्य लकारे च पररूपं विधीयते॥ तल्लुनाति रिपोः सैन्यं भवाल्लिखति सांप्रतं॥ ४९॥
कथ्यते थ विसर्गाणां संधिः शेषे च से तथा॥ विसर्गः पररूपत्वं भजते हि विभाषया॥ ५०॥ रामःश्शेते वनं रामाःषा
ड्गुण्यमनुमोदते॥ रामः साहाय्यो मेभ्रूयादेवं सर्वत्र बुध्यतां॥ ५१॥ चछयोयः शाकारो यथा रामश्चरति काननं॥
रामश्छायायां समायुक्त इत्यादिस्वयमुह्यतां॥ त्रिठषकारश्च यथा रामष्टीकाविशारदः॥ रामष्ठक्कुर एवात्र कः
खयोः पफयोस्तथा॥ ५३॥ वा सकारो यथा रामः करोति सुकृतं महत्॥ परे कस्य यथा रामष्करोति सुकृतं म
हत्॥ ५४॥ रामष्खड्गधरो धीमान्मष्व चातिपायसं॥ रामष्फलानि चिनुते दंडकायां बुभुक्षितः॥ निष्कृ
तं दुष्कृतं चापि विष्कृतं दुष्कृतं तथा॥ ५५॥ वहिष्कृतं च दुष्खेन मंत्रइत्थं च दृश्यते॥ तिरस्करोति वासवं

षा२

कांस्कानाम्रेडितेस्वनैः॥ ५६॥ उत्वं च कार्यो मध्ये यथा रामोऽत्र वर्द्धते॥ उत्तरस्य न चाप्नोति पुनरत्र न विद्यते॥ ५७॥
रामो हसति रामो यमित्यादौ चोत्वमिष्यते॥ राम आयाति नगरं श्रीराम इह तिष्ठति॥ ५८॥ राम उत्तम सौभाग्य राम
इच्छति सांप्रतं॥ राम आकारस्कभगो रामायां लिवनाद्भुहं॥ ५९॥ राम औद्धुयरहितइत्यादौ लुग्विधीयते॥
मते च कस्यचिद्यत्वं रामयेति चतद्धुह॥ ६०॥ रामायांति स्वसदनं रामायांति निजालयं॥ इत्यादौ लोप एवस्यान्नोगघ
त्यादिषु ध्रुवं॥ ६१॥ स्वरेभो अत्रभो यत्रभगो इह भगो इह॥ अघो एहि अवो एहि भवंति विहि भाषया॥ ६२॥ अघ
वनेत्र भवति अघवन्नत्र मंदिरे॥ अघो भवति सोऽलोपः कार्यं भो कुरु सांप्रतं॥ ६३॥ श्रीहरिर्गघ नीत्यादौ रेफ
एव विधीयते॥ हरिरत्र विष्णुरसावित्यादौ रेफ एव हि॥ ६४॥ संमंतार मते रामो हरिरामोऽस्ति मानसे॥ वि मा४
ष्णु रमयति स्वां जनित्यादौ रेफलुग्भवेत्॥ ६५॥ पूर्वस्वरस्य दीर्घत्वमेवं सर्वत्र बुध्यतां॥ रेफ प्रकृतिशब्दानां विशे
षो दृश्यते यथा॥ ६६॥ भ्रातर्याहि पुनर्याहि प्रातर्याहि गृहं प्रति॥ भ्रातर्गच्छ पुनर्गच्छ रामो यातीति शब्द
भाक्॥ ६७॥ रामोत्र पुनरत्रेति विशेषश्चिंतितो महान्॥ एऐओऔ प्रभृतिषु रेफलोपः परे भवेत्॥ ६८॥

K K S U LIBRARY
RAMTEK
441 106
M-864
Dist Nagpur

२५

यज्ञेश्वर गोविंद [illegible]
कपालेश्वरा जवळ पंचवटी

रामैराम्यवनं जग्मे विष्णोरोचिः प्रदीयतां ॥ गौरम्येत्यादिबोध्यं परवाच्य मनोरथः ॥ ६९ ॥
व्यंजनेचैषसपरोलोपएवविधीयते ॥ सचैषन स्मासिनमस्येयकविधीयते ॥ ७० ॥ आसौरा
मोप्पनेकृष्णसकोटयेषको वदेत् ॥ ग्रंथस्य गौरवभीयामयानोक्तं सुविस्तरं ॥ ७१ ॥ ॥
श्रीलक्ष्मीनृसिंहं प्रणतार्तिहारकं वंदे ॥ समाप्तिमगमत् ग्रंथः ॥ ध ॥

प्रबोधचंद्रिका

```
[OrderDescription]
,CREATED=22.10.20 17:05
,TRANSFERRED=2020/10/22 at 17:08:12
,PAGES=25
,TYPE=STD
,NAME=S0004437
,Book Name=M-864-PRABODH CHANDRIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
```

```
FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,
```